संस्कृत-वार्ता:

16.05.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- लोकसभा-निर्वाचनस्य पञ्चमचरणाय प्रचारः सजवं प्रवर्तते, शीर्षनेतारः एकस्यानन्तरम् अपरः इति रीत्या सभाः कुर्वन्त: सन्ति।
- ओडिशायां मतदानप्रचारे हिंसायां भाजपाकार्यकर्ता मृतः अष्टौ च गञ्जम मण्डले संघर्षे व्रणिता:।
- झारखण्ड ग्रामीण विकास मंत्री आलमगीर आलम इत्यमुं पर्यवीक्षायै निविदा आयोगीय भ्रष्टाचार -प्रकरणे प्रवर्तन-निदेशालयेन निगडित:।
- माता-वैष्णो देवी श्राइन बोर्ड इत्यनेन घोषितं यत् सम्भवतः जूनमासे जम्मूतः सांझीछ्वातपर्यन्तम् उदग्रवायुयानसेवाम् आरभते।
- भारतीयपादकन्दुकक्रीडायाः दिग्गजः क्रीडकः सुनीलछेत्री राष्ट्रियदलेन सह विशिष्टं क्रीडाजीवनं यापनानन्तरं निवृत्तेः घोषणां कृतवान्।
- आईपीएल क्रिकेट् मध्ये अद्य सायंकाले हैदराबादनगरे सनराइजर्स् हैदराबाददलं गुजरातटाइटन्स् इत्यनेन सह क्रीडिष्यति ।

<u>प्रधानमंत्री-उत्तरप्रदेश-नैर्वाचनिकसभा:</u>

सामान्यलोकसभानिर्वाचनाय प्रचाराभियानं सजवं प्रवर्तते, यतो हि शीर्षनेतार: पञ्चमचरणीयमतदानाय एकस्थानानन्तरम् अपर: इति रीत्या सभारता: सन्ति। अस्मै चरणाय प्रचाराभियानं शनिवारे समाप्तिं यास्यति। उत्तरप्रदेशे च जनान् आकर्षयितुं विभिन्नानां दलानां नेतार: तारकप्रचारकाश्च पूर्णबलेन सन्नद्धा: सन्ति। एतन्मध्ये प्रधानमन्त्री उक्तवान् यत् सीएए इति साम्प्रतिकं जाज्वल्यमानं प्रकरणमस्ति यद्धि 'मोदिन: संकल्पस्य' उदाहरणभूतमस्तीति। सहैव हि अद्य कांग्रेसदलस्य नेत्री' प्रियंकागांधी वाड्रा समाजपार्टीतिदलस्य अखिलेशयादवादय: अपि प्रचाररता: सन्ति।

## ओडिशा-हिंसा

ओडिशाप्रदेश: उच्चस्तरीय-प्रचाराभियानस्य प्रात्यक्षं करोति, यत्र सम्भावितानां चरणत्रयाणां कृते प्रचाराभियानं सजवं प्रवर्तते। एतन्मत्रे हिंसाया: अपि घटना समागतास्ति, यत्र गंजम-जनपदे भाजपेति दलस्य एक: कार्यकर्ता मारित:, अष्टौ च व्रणिता:। विवादस्यमूले प्रचारपत्रस्य संश्लेषणमधिकृत्य समुत्थितो विवाद: कारणमस्तीति उच्यते। प्रदेशेऽस्मिन् जे.पी.नड्डा नवीनपटनायकादय: वरिष्ठनेतार: प्रचारलग्ना: सन्ति।

## झारखण्ड-आलमगीर आलमः

झारखण्डस्य ग्रामीणविकासमन्त्री आलमगीर आलमः श्वः प्रवर्तननिदेशालयेन निगडितः तदनन्तरं अद्य (पीएमएलए) इति धनशोधननिवारणविधेः न्यायालये प्रस्तुतः। श्वः आरभ्य तस्य षड्दिनानां पर्यवेक्षणान्वेषण-अवधिः न्यायालयेन अनुमोदित:।

## जम्मू-कश्मीर-वैष्णो देवी उदग्रवायुयानसेवाम्

जम्मू-कश्मीरे अल्पावध्ये विशेषदर्शनस्य इच्छुक तीर्थयात्रिभ्य: सुविधादानाय वैष्णो देवी तीर्थ बोर्ड इत्यनेन पूर्वमेव घोषितं यत् सम्भवतः जूनमासे जम्मूतः सांझीछातपर्यन्तम् उदग्रवायुयानसेवाम् आरभते।

## उत्तरप्रदेश-अखिलेशकेजरीवालौ

केन्द्रशासितप्रदेशस्य देहल्या: मुख्यमन्त्री आमआदमीपार्टीति दलस्य नेता च अरविन्दकेजरीवाल: अद्य भाजपेति दलस्योपरि वाचिकाक्रमणं कुर्वन् अवोचत् यत् काषायदलीया: वदन्ति यत् तेभ्य: निर्वाचनेऽस्मिन् चतुश्शताधिकानि लोकसभा-आसन्दानि अपेक्ष्यन्ते इति, यतो हि ते संविधानं परिवर्तयितुमिच्छन्ते, आरक्षणञ्च समापयितुमिच्छन्ते। स: अद्य लखनऊनगरे समाजवादी पार्टीति दलाध्यक्षेण अखिलेश यादवेन सह सम्वाददातृसम्मेलनं सम्बोधयन् आसीत्। श्रीकेजरीवालेन उक्तं यत् भाजपा आरएसएस च इत्येतयो: पूर्णतन्त्रं सर्वदैव आरक्षण-विचारस्य विरोधे आसीत्। तेन जना: सञ्चेतिता: यत् भाजपेति दलं संविधानस्य परिवर्तने रुचिं धत्ते इति। सम्वाददातृभि: समं भाषमाण: अखिलेश-यादव: अवोचत् यत् भाजपेति दलं भ्रामकं दलमस्तीति, तेनोक्तं यत् जनाश्च अवगतवन्त:, अत: ते दलमिमं न स्वीकरिष्यन्तीति। इण्डी इत्याख्य: वैपक्षिक-संघोऽयं संविधानेन सह जनसामान्यानां मूलभूतावश्यकतानाञ्च रक्षणाय अस्तीति।

ठाकुर-संकेतभाषा:

सूचनाप्रसारणमन्त्री अनुरागसिंहठाकुरः विंशतिं प्रति विंशतिः विश्वप्रतिस्पर्धा चतुर्विंशत्यधिक द्विसहस्त्र वर्षस्य समये भारतीयसांकेतिभाषायाः श्रव्यवर्णनात्मकटिप्पणीं च प्रदातुं इण्डिया साइनिंग हैण्ड्स् प्राइवेट् लिमिटेड् इत्यनेन सह अनेकानाम् निजीक्रीडाप्रसारमाध्यमैः सह कार्याय प्रशंसाम् अकरोत्। सामाजिकमाध्यमेषु एकस्मिन् सन्देशे सः अवदत् यत् समावेशीतायाः कृते सर्वकारस्य दृष्ट्या च एतत् महत्त्वपूर्णं सोपानम् अस्ति।

उत्तराखण्ड- चारधाम -यात्रा

उत्तराखण्ड-राज्ये तीर्थयात्री पञ्जीकरणं विना चारधाम-यात्रा इति न कर्तुं शक्यते। बाधादिषु बिन्दुषु कठोरपरीक्षणं भविष्यति, पञ्जीकरणं विना जनाः तीर्थयात्रायै न गन्तुं शक्नुवन्ति। प्रदेशस्य मुख्यसचिवः राधारतुडी इत्यनया उक्तं यत् चारधामयात्रायाः पञ्जीकरणप्रक्रियायाः विषये स्वस्वराज्यात् आगच्छन्तः तीर्थयात्रिकाः अवगताः भवेयुः इति सर्वेषां राज्यानां मुख्यसचिवा: पत्रद्वारा सूचिताः भवन्ति।

नेतन्याहू-राफाक्रमणम्

इस्राइलदेशस्य प्रधानमन्त्रिणा बेंजामिन नेतन्याहू इत्यनेन दक्षिणी-गाजा-नगरे चतुर्णां हमाससैन्यदलानां नाशस्योपरि बलं ददता प्रोक्तं यत् राफा इत्यत्र सैन्याक्रमणस्य विषय: कतिपय सप्ताहानामस्ति न हि मासानां वर्षाणां वा। श्री बेंजामिनेन एकस्मै अमेरिकादेशस्य प्रसारकाय प्रदत्ते साक्षात्कारे प्रोक्तं यत् इस्राइल-अमेरिकादेशयोर्मध्ये कतिपयविषयेषु असहमति: अस्ति, परं यदा-कदा भवता तदेव कर्तव्यं भवति, यद्धि भवत: अस्तित्वभविष्ययो: सुनिश्चयाय आवश्यकं भवतीति।

स्लोवाकिया प्रधानमन्त्री

स्लोवाकप्रधानमन्त्री श्री रॉबर्टफिको ब्रातिस्लावा-क्षेत्रस्य ऐशान्यदिश: लघुनगरे गोलिकाप्रहारेण व्रणितोऽस्ति। चिकित्सालये च उपचाराधीन अस्ति। गतसंध्यायां रक्षामन्त्रिणा रॉबर्टकलिनकेन प्रोक्तं यत् श्रीफिको त्रिहोराधिककालात् शल्योपचाराधीन: आसीत्, स्थितिश्च गभीरा आसीदिति। उपप्रधानमन्त्रिणा टॉमस-ताराबा इत्यनेन प्रोक्तं यत् एकोनषष्टिवर्षीय: नेता सम्प्रति जीवनाय संकटास्पदकाले नास्तीति। राष्ट्रपतिना सह स्लोवाकनेतृभि: गोलिकाप्रहार: लोकतंत्रस्योपरि आक्रमणम् अस्तीति प्रोक्तम्। अमेरिकादेशस्य राष्ट्रपतिना जो बाइडेन इत्यनेन अपि अस्या: दुर्घटनाया: भयावह-कृत्यमिति वदता निन्दा कृता।

## ऋतुविज्ञानम्

दक्षिण-पश्चिमदिग्देशीया वर्षा-ऋतु: अस्य मासस्य दिनान्तं यावत् केरलप्रदेशं प्राप्तुं शक्नोति, तत्र चतुर्णां दिवसानां मानकविचलनस्य संभावना वर्तते। भारतीय-ऋतुविज्ञानविभागेन प्रोक्तं यत् अस्या: वर्षा-ऋतो: भारतस्य मुख्यां मध्यभूमिञ्च प्रापणेन अस्मात् उष्ण-शुष्कयो: वातावरणात् मुक्तिपूर्वकं वर्षाया: संक्रमणमपि भविष्यतीति। गतवर्षे वर्षेयं जूनमासस्य अष्टदिनांके आगतासीत्।

## नीरजचोपडा-स्वर्ण:

ऋष्टिप्रक्षेपक: ओलम्पिक-क्रीडा-श्रेष्ठ: नीरजचोपडा इत्यनेन ह्य: भुवनेश्वरे अस्य वर्षस्य फेडरेशन-कप इत्यस्यां स्पर्धायां स्वर्णपदकं विजितम्। षड्विंशतिवर्षीयाय तारकक्रीडकाय प्रतियोगिताया: प्रारम्भिककाल: संघर्षपूर्ण: आसीत् यतो हि त्रिषु चक्रेषु स: द्वितीयस्थाने आसीत् परम् अन्तिमे चक्रे दशमलवसप्तविंशति: उत्तर-द्व्यशीतिमीटरात्मकदूरं यावत् ऋष्टि-प्रक्षेपेण स: स्वर्णपदकमलभत्।

## सुनील छेत्री सेवानिवृत्ति:

भारतीयपादकन्दुकक्रीडायाः दिग्गजः क्रीडकः सुनीलछेत्री राष्ट्रियदलेन सह विशिष्टं क्रीडाजीवनं यापनानन्तरं निवृत्तेः घोषणां कृतवान्। एकस्मिन् सामाजिकप्रसारक तंत्रजाले छेत्री इत्यनेन प्रकटितं यत्, अस्मिन् वर्षे कोलकातानगरस्य साल्टलेक्-क्रीडाङ्गणे कुवाल्टदलं-विरुध्य षोडश जून-दिनाङ्के आगामि-क्रीडा तस्य अन्तिम-प्रदर्शनं भविष्यतीति।

## आई.पी.एल.

आई.पी.एल इत्येतस्यां क्रिकेट्-प्रतिस्पर्धायां गतदिने समायोजिते द्वन्द्वे पंजाब किंग्स इत्येतेन दलेन राजस्थान-रॉयल्स इति दलं पञ्चस्तोभपुरस्सरं पराजितम्। गुवाहाट्यां क्रीडिते एतस्मिन् द्वन्द्वे प्रथमं दण्डेन क्रीडयता राजस्थान-रॉयल्स इति दलेन चतुश्चत्वारिंशदुत्तर- एकशतं धावनांका: समर्जिता:, प्रत्युत्तरे पंजाब किंग्स इति दलेन सहजतया एव धावनांकान् समर्ज्य लक्ष्यं समधिगतम्। प्रतिस्पर्धायामद्य सनराईजर्स हैदराबाद-गुजरात टाइटंस्-इत्यनयो: दलयो: मध्ये स्पर्धा हैदराबादस्थे राजीव-गान्धि-अन्ताराष्ट्रिय-क्रिकेट-क्रीडांगणे समायोजयिष्यते।

।। इति वार्ता: ।।